## सप्तदशः पाठः

# सत्कर्म एव धर्मः

एकदा विक्रमादित्यः नगरभ्रमणसमये एकं मरणासन्नं रुग्णं दृष्टवान्। तस्य दर्शनेन मनसि वैराग्यम् उद्भूतम्। अतः मायामोहमयं संसारं ज्ञात्वा सः महामन्त्रिणि राज्यभारं समर्प्य वनम् अगच्छत्।

वने सः कठिनां तपस्याम् आरब्धवान्। तस्य समीपे एव एकः महात्मा अपि तपस्यारतः आसीत्। महात्मा तम् अवदत्, "राजन्! भवान् तु यथानीतिः राजधर्मस्य पालनं करोतु। धर्मानुकूलं शासनम् अपि धर्म एव भवति" इति स महात्मा विक्रमादित्यम् उपदिष्टवान्। विक्रमः अवदत्– "नहि महात्मन्! तपसा एव परलोकः साध्यते, कर्मणा नेति।" महात्मा अवदत्, "राजन! राज्ञः धर्मः प्रजापालनं, शासनम् एव अस्ति तपस्या तु महात्मनां कर्म इति।" इत्युक्त्वा महात्मा राजानं पृष्टवान् - कर्म-तपस्ययोः कः भेदः?

राजा अवदत्– कर्मणः स्थानं भिन्नं परं तपस्या स्वर्गप्राप्तेः साधनम्। एतच्छ्रुत्वा महात्मा हसन् अवदत्– "राजन्! मनुष्यः उत्तमानि कर्माणि कृत्वा अपि परलोकं साधयितुं शक्नोति।" अनन्तरं महात्मा योगबलेन तत्रैव यमलोकस्य दृश्यं विक्रमं दर्शितवान्। दृश्ये यमराजः दूतान् पृच्छति– "एतस्य कर्म कीदृशम्?" एकः दूतः अवदत्– "कर्मणां लेखनं तु चित्रगुप्तस्य पार्श्वे अस्ति।" क्षणं विचार्य यमराजः दूतान् आदिष्टवान् यत्– "यदि एतस्य कर्माणि उत्तमानि सन्ति तर्हि स्वर्गस्य द्वारम् उद्घाटयतु यदि कर्माणि अधमानि, तदा बलात् नरके पातयतु।

इदं दृश्यं दृष्ट्वा विक्रमः ज्ञातवान् यद्– 'सदाचारः एव तपस्या, सत्कर्म एव धर्म' इति। अनन्तरं सः तं महात्मानं प्रणम्य, श्रेष्ठाचरणस्य प्रतिज्ञां कृत्वा राजधानीम् उज्जयिनीम् आगतवान्। आगत्य धर्मानुकूलं नीतिपूर्वकं प्रजापालनपुरस्सरं शासनं कृतवान्। सः अद्यापि लोके सत्कर्मणा एव प्रसिद्धः। तस्य जीवनस्य ध्येयवाक्यम् आसीत्— 'सत्कर्म एव धर्मः।'

### शब्दार्थाः

| | | | |
|---|---|---|---|
| बलात् | — बलपूर्वक | एतच्छ्रुत्वा | — ऐसा सुनकर |
| पार्श्वे | — पास में | साधयितुम् | — सिद्ध करने के लिए |
| मरणासन्नम् | — मृत्यु के निकट वाले को | प्रजापालनपुरस्सरम् | — प्रजापालन को प्रमुखता देते हुए |
| उद्भूतम् | — उत्पन्न हुआ | पातयतु | — गिराओ |

## अभ्यासः

### 1. एकपदेन उत्तरं लिखत—

क. विक्रमादित्यः नगरभ्रमणसमये किं दृष्टवान्?

ख. विक्रमादित्यः महामन्त्रिणि राज्यभारं समर्प्य कुत्र अगच्छत्?

ग. महात्मा कस्य समीपे तपस्यारतः आसीत्?

घ. महात्मा योगबलेन तत्र कस्य दृश्यं दर्शितवान्?

ङ. कर्मणां लेखनं कस्य पार्श्वे अस्ति?

च. श्रेष्ठाचरणस्य प्रतिज्ञां कृत्वा विक्रमादित्यः कुत्र आगतवान्?

### 2. एकवाक्येन उत्तरं लिखत—

क. महात्मा विक्रमादित्यं किम् उपदिष्टवान्?

ख. कर्म-तपस्ययोः कः भेदः?

ग. विक्रमादित्यः अन्ते किं ज्ञातवान्?

घ. विक्रमादित्यः लोके कथं प्रसिद्धः?

ङ. विक्रमादित्यस्य ध्येयवाक्यं किम् आसीत्?

च. विक्रमादित्यस्य मनसि केन वैराग्यम् उद्भूतम्?

छ. "सत्कर्म एव धर्मः" कथायाः सारः कः?

### 3. रिक्तस्थानानि पूरयत—

क. विक्रमादित्यस्य समीपे एकः .................. तपस्यारतः आसीत्। (महात्मा / दुरात्मा)

ख. तपस्या .................... साधनम्। (स्वर्गप्राप्तेः / राज्यप्राप्तेः)

ग. यमराजः .................... आदिष्टवान्। (विक्रमादित्यम् / दूतान्)

घ. वने सः कठिनां .................... आरब्धवान्। (दिनचर्याम् / तपस्याम्)

ङ. प्रजापालनं धर्मः .................... अस्ति। (तपस्वीनाम् / राज्ञाम्)

### 4. उचितं मेलयत—

| | अ | | ब |
|---|---|---|---|
| क. | सदाचारः एव | - | धर्मः |
| ख. | महात्मा उपदिष्टवान् | - | परलोकः साध्यते |
| ग. | तपसा | - | सत्कर्म एव धर्मः |
| घ. | विक्रमादित्यस्य ध्येयवाक्यम् | - | विक्रमादित्यम् |
| ङ. | सत्कर्म एव | - | तपस्या |

5. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत—**

क. ध्येयवाक्यम्

ख. तपस्यारतः

ग. प्रजापालनम्

घ. योगबलेन

ङ. श्रेष्ठाचरणेन

6. **नोमोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—**

क. धर्मानुकूलम्

ख. नेति

ग. सदाचारः

घ. अद्यापि

ङ. विक्रमादित्यः

7. **रेखाङ्कितशब्दानाम् आधारेण प्रश्ननिर्माणं कुरुत—**

क. विक्रमः अवदत्।

ख. तपस्या तु महात्मनां कर्म इति।

ग. तत्रैव यमलोकस्य दृश्यं दर्शितवान्।

घ. यमराजः दूतान् पृच्छति।

ङ. राज्ञः धर्मः प्रजापालनम्।

**योग्यताविस्तारः —**

- विक्रमादित्यस्य कथासङ्ग्रहं कुरुत।

*कर्मण्येवाधिकारस्ते।*